# पसायदान

## विश्वात्मा मोदतां प्रभु ः

## (ज्ञानेश्वरकृत पसायदानस्य भावानुवादः)

(संस्कृत भावानुवाद)

---

अद्य वाङ्मययज्ञेन विश्वात्मा मोदतां प्रभुः ।
प्रसन्नीभूय दानं मे प्रसादस्य प्रयच्छतु ॥
खलानां वक्रता भिंद्यात् सत्कर्मासक्तिरेधताम् ।
प्राणिमात्रेमिथो हार्दं समुदेतु निरन्तरम् ॥
नाशमेतु तमोऽधानां धर्मादित्योऽस्तु सम्मुखम् ।
यदीच्छतीह यो जन्तुरकष्टं स तदाप्नुयात् ॥
सर्वमंगलवर्षावं कुरुद्भिरिह भूतले ।
भूतानामीशनिष्ठैश्च भूयात् संगो निरन्तरम् ॥
अर्बुदाः कल्पवृक्षाणां चरन्तो ये महीतले ।
चित्‌चिन्तामणिविश्रामा वागीशाश्च सुधार्णवाः ॥
अलांछना नु ये सोमा ऊनदाहाश्च भास्कराः ।
सन्तु सन्तो हि सर्वेषां सुहृदः सर्वदैव ते ॥
आत्यंतिकं सुखं प्राप्य सर्वै त्रैलोक्यवासिभिः ।
ईड्य एवादिदेवोऽयं भूयः किं बहुनाऽधुना ॥
येषां जीवातुभूतोऽयं ग्रंथस्तेषां मुदात्मनाम् ।
इहामुत्रार्थभोगेभ्यो विरतिः स्यात् चिरंतनी ॥
तत ऊचे प्रसन्नात्मा श्रीविश्वेशः तथाऽस्त्विति ।
ज्ञानदेवो वरं वृत्वा निजानन्दे विराजितः ॥

*****

वैद्य श्रीनिवास पु. हिर्लेकर

**(By: Vaidya Shriniwas P. Hirlekar)**